पेपिसकः-सिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककिटतिवत् (190) बोध्यानि । [1]पेस्वरः, अनुपिसितः[A] ।

## (1006) "पीङ् पाने" (IV-दिवादिः-1141. सक. अनि. आत्म.)

### स्वादिः ।

पायकः-यिका, पायकः-यिका, पिपीषकः-षिका, पेपीयकः-यिका ; इत्यादीनि सर्वाण्यपि रूपाणि दैवादिकधीङ्धातुवत्, (901) ज्ञेयानि । पीयमानः, [2]पाययन्-न्ती, [3]पीवा, इतीमानि रूपाणि अधिकान्यत्रेति विशेषः । आपीय[B] ।

## (1007) "पीड अवगाहने" (X-चुरादिः-1544. सक. सेट्. उभ.)

अवगाहनम्—**बाधनम्** । '**बाधगाहनयोः**' इति द्रुमे । '**—गहने**' इति **क्षीरस्वामी** ।

पीडकः-डिका, पिपीडयिषकः-षिका ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिककीटयतिवत् (194) ज्ञेयानि । णमुलि–[4]पाणावुपपीडं पाण्युपपीडं, पाणिनोपपीडं [वा धारयति] । [5]पीडा, [6]जनापीडः, [C]मुष्टिपीडम्,

---

1. 'स्थेशभासपिस—' (3-2-175) इति ताच्छीलिके वरच्प्रत्यये एवं रूपम् ।
2. 'निगरणचलनार्थेभ्यश्च' (1-3-87) इति ण्यन्तात् नित्यं परस्मैपदम् ।
3. 'अन्येभ्योऽपि दृश्यन्ते (3-2-75) इति वनिप्प्रत्यये एवं रूपम् ।
4. 'सप्तम्यां चोपपीडरुधकर्षः' (3-4-49) इति णमुल् । 'तृतीयाप्रभृतीन्यन्यतरस्याम्' (2-2-21) इति समासविकल्पः ।
5. युचं बाधित्वा भिदादिपाठात् (3-3-104) अङ् ।
6. 'कर्मण्यण्' (3-2-1) इति अण्प्रत्यये रूपम् । जनान्, आ=समन्तात् पीडयतीति विग्रहः ।

A. 'जीमूतचर्चिरवझर्झरवायहृद्यं
तेनैव चाऽनुपिसितो निलयं पिपेस ॥' धा. का. 1.89.

B. 'आपीय तद्गिरममाननिरीतरोषः
प्रीतिं श्यतोऽस्य स करेण शिरोधिमच्छात् ।' धा. का. 2.59.

C. 'धनुररिभिरसह्यं मुष्टिपीडं दधाने ।' (भ. का. 1-26) इत्यत्र 'उप' इत्युपसर्गस्याविवक्षा ज्ञेया । यथा 'उपेयिवान्' इत्यत्र, 'ईयिवान्' इति सिद्ध्यर्थं 'उप' इत्यस्याविवक्षा ।